শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে একপঞ্চাশং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে একপঞ্চাশং দশকম্॥

## অঘাসুরৱধৱর্ণনম্

কদাচন ৱ্রজশিশুভিঃ সমং ভৱান্
ৱনাশনে ৱিহিতমতিঃ প্রগেতরাম্।
সমাৱৃতো বহুতরৱৎসমণ্ডলৈঃ
সতেমনৈর্নিরগমদীশ জেমনৈঃ॥ **51.1** ॥

ৱিনির্যতস্তৱ চরণাম্বুজদ্ৱযা -
দুদঞ্চিতং ত্রিভুৱনপাৱনং রজঃ।
মহর্ষযঃ পুলকধরৈঃ কলেবরৈ -
রুদূহিরে ধৃতভৱদীক্ষণোৎসৱাঃ॥ **51.2** ॥

প্রচারযত্যৱিরলশাদ্ৱলে তলে
পশূন্ ৱিভো ভৱতি সমং কুমারকৈঃ।
অঘাসুরো ন্যরুণদঘায ৱর্তনীং
ভযানকঃ সপদি শযানকাকৃতিঃ॥ **51.3** ॥

মহাচলপ্রতিমতনোর্গুহানিভ -
প্রসারিতপ্রথিতমুখস্য কাননে।
মুখোদরং ৱিহরণকৌতুকাদ্গতাঃ
কুমারকাঃ কিমপি ৱিদূরগে ৎৱযি॥ **51.4** ॥

প্রমাদতঃ প্রৱিশতি পন্নগোদরং
ক্বথত্তনৌ পশুপকুলে সৱাৎসকে।

ৱিদন্নিদং ৎৱমপি ৱিৱেশিথ প্রভো
সুহৃজ্জনং ৱিশরণমাশু রক্ষিতুম্॥ **51.5** ॥

গলোদরে ৱিপুলিতৱর্ষ্মণা ৎৱযা
মহোরগে লুঠতি নিরুদ্ধমারুতে।
দ্রুতং ভৱান্ ৱিদলিতকণ্ঠমণ্ডলো
ৱিমোচযন্ পশুপপশূন্ ৱিনির্যযৌ॥ **51.6** ॥

ক্ষণং দিৱি ৎৱদুপগমার্থমাস্থিতং
মহাসুরপ্রভৱমহো মহো মহৎ।
ৱিনির্গতে ৎৱযি তু নিলীনমঞ্জসা
নভঃস্থলে ননৃতুরথো জগুঃ সুরাঃ॥ **51.7** ॥

সৱিস্মযৈঃ কমলভৱাদিভিঃ সুরৈ -
রনুদ্রুতস্তদনু গতঃ কুমারকৈঃ।
দিনে পুনস্তরুণদশামুপেযুষি
স্ৱকৈর্ভৱানতনুত ভোজনোৎসৱম্॥ **51.8** ॥

ৱিষাণিকামপি মুরলীং নিতম্বকে
নিৱেশযন্ কবলধরঃ করাম্বুজে।
প্রহাসযন্ কলৱচনৈঃ কুমারকান্
বুভোজিথ ত্রিদশগণৈর্মুদা নুতঃ॥ **51.9** ॥

সুখাশনং ৎৱিহ তৱ গোপমণ্ডলে
মখাশনাৎ প্রিযমিৱ দেৱমণ্ডলে।
ইতি স্তুতস্ত্রিদশৱরৈর্জগৎপতে
মরুৎপুরীনিলয গদাৎ প্রপাহি মাম্॥ **51.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে একপঞ্চাশং দশকং সমাপ্তম্ ॥